## मम्मटमनुसृत्य काव्यकारणानि निरुप्यन्ताम्।

एकादशख्रीष्टाब्दस्यान्तिमभागे अविर्भूतेन आलंकारिकेण मम्मटेन रचितः प्रख्यातः अलंकारग्रन्थो हि काव्यप्रकाशः। प्रभूतेन पाण्डित्येन तथा सूक्ष्मदर्शितया सुपरिकल्पितरुपेण अलंकारशास्त्रस्य वहवो विषया अत्र प्रतिपादिताः। अस्मिन् ग्रन्थे दश उल्लासाः वर्तन्ते। तत्र प्रथमं काव्यप्रयोजनं काव्यकारणं तथा काव्यलक्षणं निरुपितम्। तन्मतं यशः, अर्थः, व्ववहारज्ञानम् अमङ्गलनाशः सद्य आनन्दलाभस्तथा कान्तामम्मितः उपदेशलाभः इत्येतानि हि काव्यस्य प्रयोजनानि। प्रतिभा व्युत्पत्तिः अभ्यासश्च त्रयं सम्मिलता एव काव्यस्य कारणम्। काव्यलक्षणं तेनोक्तं तददोषौ शब्दार्थो सवुणावनलंकृती पुनः क्वापि इति। तन्मते दोषरहितौ गुणयुक्तौ सालंकारौ कुत्रापि निरलंकारौ शब्दार्थ काव्यम्।

सर्वाणि कार्याणि हि कारणजातानि। काव्यस्य कार्यत्वात् तस्यापि कारणमस्ति इति कृत्वा संस्कृतालंकारशास्त्रे काव्यकारणविषये प्रभूतं पर्यालोचनं कृतम्। मम्मटपूर्वाचार्यैः भामहदण्डिप्रभृतिभिः काव्यस्य हेतुत्रयम् अङ्गीकृतम् – प्रतिभा व्युत्पत्तिः प्रभ्यासश्चेति भामहेनोक्तं काव्यालंकारग्रन्थे – ''काव्यं तु जायते जातु कस्यचित् प्रतिभावतः '' इति। काव्यकारणेषु तेन प्रतिभायाः प्राधान्यम् अङ्गीकृतम्। परतश्च व्युत्पत्तिः अभ्यासश्च तेनालोचितौ काव्यकारणतया।

दण्डनापि काव्यादर्शग्रन्थे काव्यस्य हेतुत्रयमेव वर्णितम्। यथा —

''नैसर्गिकी च प्रतिभा श्रुतं च वहु निर्मलम्।
अमन्दश्चभियोगोऽस्याः कारणं काव्यसम्पदः।। ''

अत्र श्रुतपदेन व्युत्पत्तिः वहुशास्त्रज्ञानं तथा अभियोगपदेन अभ्यासः वोधितः। कारणम् इत्येकवचनेन त्रयः हेतवः सम्मिलिततया काव्यम् उत्पादयन्ति न तु पृथक्तया इति ज्ञायते। एतयोः पूर्वाचार्ययोः पदाङ्कम् अनुसृत्य मम्मटेन काव्यकारणम् उक्तं काव्यप्रकाशे –

शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात्।
काव्यज्ञशिक्षयाभ्यास इति हेतु स्तदुद्भवे।।इति।

तत्र शक्तिर्हि प्रतिभा कवित्ववीजरुपसंस्कारविशेषः। शाक्तिं विना काव्यं न प्रसरेत् रचितं वा उपसनीयं भवेत्। मम्मटोक्तं लोकशास्त्रकाव्यद्यवेक्षणं हि व्युत्पत्तिः। काव्यरचनायाः प्राक् स्थावरजङ्गमामकस्य लोकवृत्तस्य ज्ञानं प्रयोजनीयम्। लोकस्तु भूवने जने इत्यमरवचनात् लोकशब्देन

जना: भुवनवृत्तानि च वोध्यानि। शास्त्राणां च छन्दोव्याकरणाभिधानकोषाणां कलाविद्यानां शस्त्रादिविद्यानां तथा महाकविनिवद्धानां काव्यानां तथा इतिहासादीनां पर्यालोचनात् जायते व्युत्पत्ति:। एषा हि काव्यस्य द्वितीयं कारणम्।

काव्यरचनायास्तृतीयं कारणं हि अभ्यास:। ये काव्यं रचयितुं तथा विचारयितुं जानन्ति तदुपदेशेन काव्यजनाया: पुन: पुन: प्रयास: हि अभ्यास:। मम्मटमते एते त्रय: हेतव: समुदिता न तु व्यस्ता: काव्यस्य निर्माणे उत्कर्षे च हेतुर्न हेतव:।

शक्ति: – वृत्तौ प्रतिभाया स्वरुपवर्णने मम्मटेन वामनमतं विशेषत: अनुसृतम्। वामनेन उक्तं काव्यालंकारसूत्रवृत्तौ–कवित्ववीजं प्रतिभानम् इति। कवित्ववीजं जन्मान्तरागतसंस्कारविशेष: कश्चिद् यस्माद् विना काव्यं न निष्पद्यते निष्पन्नं वा हास्यायतनं स्यात्। इति। अभिनवगुप्तमतेन प्रतिभा हि अपुर्ववस्तुनिर्माणक्षमा प्रगा। राजशेखरेण काव्यमीमांसायामुक्तं या शब्दग्रामम् अर्थसार्थम् अलंकारतन्त्रम् उक्तिमार्गम् अन्यदपि तथाविधम् अधिहदयं (कवे इदये) प्रतिभासयति सा प्रतिभा इति। भट्टतौतेनोक्तं तथा –

प्रज्ञा नवनवोन्मेषशालिनी प्रतिभा मता।
तदनुप्राणनाज् जीवेद् वर्णनानिपुण: कवि:।।इति।

प्रतिभाया वैशिष्टयं हि रसपरिवेषणनैपुण्यं दोषराहित्यं सौन्दर्यवोधप्रकाशनमिति। राजशेखरेण प्रतिभाया द्वैविध्यं प्रकाशितं कारयित्री प्रतिभा (कवे:) भावयित्री प्रतिभा (सहृदयस्य) इति।

निपुणता–अनेन शब्देन व्युत्पत्ति र्वोधिता मम्मटेन। नानाशास्त्रचर्चाया जातं यत् सुदृढं ज्ञानं तज्जन्य: संस्कार हि निपुणता। स्थावराणां जङ्गमानां लोकवृत्तानां ज्ञानं कवेरावश्यकम्। कविना काव्यरचनाया: प्राक् अधीतव्यं छन्द:शास्त्रं व्याकरणं कोषशास्त्रं चतुषष्टि कलाविद्या: चतुर्वर्गविषयकं ज्ञानम् तथा इस्त्यश्वादिविषयकविद्या शस्त्रविद्यादि विषये कविना नैपुण्यम् अर्जनीयम्। कविना अपरेषां कवीनां काव्यान्यपि अधीतव्यनि। एतदेव लक्ष्यज्ञत्वम् इति वामनेनोक्तम्।

अभ्यास: – काव्यज्ञानां सविधे अपविश्य तेषाम् उपदेशग्रहणं कविना कर्तव्यम्। एषा हि वृद्धसेवा इत्युक्तं वामनेन। काव्यज्ञस्य उपदेशानुसारेण पुन: पुन: शब्दयोजने प्रयास: हि अभ्यास:। पुन: पुन: आधानोद्धरण माध्यमेन एव कवि: यथायथपदविन्यासे समर्थो भवति।

एतेषां त्रयाणां कारणनां मध्ये शक्तिरेव वलिष्ठा मन्तव्या। तथापि मम्मटेन त्रयाणां मिलितरुपेण काव्यकारणत्वम् अङ्गीकृतम्। एतएव वृत्तौ तेनोक्तं — ''हेतुर्न हेतव:'' इति।। एतस्मिन् विषये मम्मटेन दण्डिमतम् अनुसृतम्। तस्मात् उक्तानां त्रयाणां हेतूनां कोऽपि अन्यनिरपेक्षतया काव्यकारणं भवितुं नार्हति। दण्डिना तथा पण्डितराजेन जगन्नाथेन च मन्यते यद्यपि प्रतिभा हि प्रधानं काव्यकारणम् तथापि यत्र प्रतिभा नास्ति तत्र व्युत्पत्ति: अभ्यासश्च काव्यं जनयति इति। उक्तं दण्डिना —

न विद्यते यद्यापि पूर्ववासना गुणानुवन्धि प्रतिभानमद्भुतम्।
श्रुतेन यत्नेन च वागुपासिता ध्रुवं करोत्येव कमप्यनुग्रहम्।।'' इति।

यत: शक्त्यादित्रितयं दण्डचक्रन्यायेन काव्यं प्रति कारणमित्यत्र सन्निवेशितम्। न तृणारणिमणिन्यायेन यथा – तृणारणिमणिभ्य: एकस्योपादानेऽपि अग्निसम्भव: तथा शक्त्यादिषु त्रिषु एकस्य कस्याचित् उपादानेऽपि न काव्यसम्भव:। अत: दण्डचक्रादीनां सहयोगेन घटादिनिर्माणवत् शक्त्यादियोगेन काव्यनिर्माणम्। एतेषां मिथ: मिलनेन हेतुरिति एकवचनं युक्तियुक्तम्।